International Journal of Sanskrit Research 2025; 11(5): 145-151

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(5): 145-151
© 2025 IJSR
www.anantaajournal.com
Received: 08-08-2025
Accepted: 11-09-2025

**डॉ. महानन्दतिमिल्सिना**
सहप्राध्यापकः - साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः,
पिण्डेश्वरविद्यापीठम्, धरानः, नेपाल

**Corresponding Author:**
**डॉ. महानन्दतिमिल्सिना**
सहप्राध्यापकः - साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः,
पिण्डेश्वरविद्यापीठम्, धरानः, नेपाल

# काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतस्य रसतत्त्वस्य तुलनात्मकमध्ययनम्

**महानन्दतिमिल्सिना**

**DOI:** https://www.doi.org/10.22271/23947519.2025.v11.i5c.2807

**सारांश**

लेखेऽस्मिन् काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतस्य रसतत्त्वस्य तुलनात्मकमध्ययनं कृतमस्ति । काव्यप्रकाशग्रन्थनिर्माता मम्मटोऽलङ्कारसिद्धान्तानुयायी वर्तते, एवमेव साहित्यदर्पणग्रन्थरचयिता विश्वनाथ आनन्दवर्धनप्रवर्तितं ध्वनिसिद्धान्तं स्वीकृत्य रसध्वनिमेव काव्यस्यात्मात्वेन स्वीकरोति । मूलतो विश्वनाथेन रसात्मकं वाक्यमेव काव्यम् इति लक्षणं प्रस्तूय काव्ये रसतत्त्वं प्राधान्येन प्रतिपादितम् । एवञ्चानेन रसानुभूतिक्रमे भावकत्व-भोजकत्वव्यापारयोः कल्पना प्रस्तुता । अनेन सहृदयस्य चित्तवृत्तेः सामान्यीकरणेन मनोवैज्ञानिकं विश्लेषणं विहितम् । द्वयोरपि ग्रन्थयोर्भट्टलोल्लट-श्रीशङ्कुक-भट्टनायक-अभिनवगुप्तानां रससूत्रविषयकं मतं प्रस्तुतम्, तत्र काव्यप्रकाशे विस्तरेण व्याख्यानमस्ति चेत् साहित्यदर्पणे सङ्क्षेपेण प्रस्तुतमस्ति । साहित्यदर्पणे करुणादिरसेभ्यः कथं सुखं सञ्जायत इति विषयः सोदाहरणं सकारणं च प्रस्तुतम् । अत्र रसानुभूतौ साधारणीकरणव्यापारस्य विवेचनं कृतम्, एवञ्च रसस्यालौकिकत्वञ्च विविधैः प्रमाणैः प्रमाणितम् । तथैवात्र विभावविवेचने विश्वनाथेन धीरोदात्तादीनां चतुर्विधानां नायकानां स्वकीयापरकीयादीनां बहुविधानां नायिकाभेदानां विवेचनञ्च कृतमस्ति परं मम्मटेन नायकनायिकाभेदानां चर्चा नैव विहिता । विश्वनाथेन वत्सलरसस्यापि विश्लेषणं कृतम् । उभयग्रन्थयो रससिद्धान्ते मूलभूताः साम्याः सन्ति, यतस्तौ भरतमुने रससूत्रम् आधारीकुरुतः । मूलतो मम्मटस्यापेक्षायां विश्वनाथेन सूक्ष्मरूपेण रसतत्त्वस्य विवेचनं कृतं संलक्ष्यते । लेखोऽयं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितो विद्यते । अस्मिननुसन्धाने द्वितीयकस्रोतयुतानां सामग्रीणां संयोजनं कृतमस्ति ।

**कुटशब्दः** मम्मटः, रसः, विश्वनाथः, साधारणीकरणम्, स्थायिभावः

**प्रस्तावना**

एकादशशताब्द्यां जातः, आचार्य मम्मटः संस्कृतकाव्यशास्त्रस्य महान् आचार्यः, समीक्षकश्च । अस्य प्रमुखः ग्रन्थः काव्यप्रकाशः । अत्र दश उल्लासाः सन्ति । असौ आनन्दवर्धनस्य ध्वनिवादस्य समर्थकः । अस्य काव्यप्रकाशे अभिनवगुप्तस्य मतानां समावेशः, भरतमुनेः, अन्येषामाचार्याणां मतानां समन्वयश्च संलक्ष्यते । मम्मटेन काव्यलक्षणविवेचनक्रमे गुणालङ्कारयोर्महत्त्वं, रसस्य च प्राधान्यं प्रतिपादितमस्ति । एवमेव चतुर्दशशताब्द्यां जात आचार्य विश्वनाथः संस्कृतकाव्यशास्त्रस्य प्रमुख आचार्यः समीक्षकश्च । अस्य प्रमुखो ग्रन्थः साहित्यदर्पणम् । अस्मिन् ग्रन्थे दश परिच्छेदाः सन्ति । अनेन काव्यस्य आत्मा रसः स्वीकृतः । अनेनैव रससिद्धान्तः सर्वोच्चरूपेण स्थापितः । रससिद्धान्तस्य प्रवर्तकः प्रथमशताब्द्यां जातो भरतमुनिरेव । भरतेन स्वकीये नाट्यशास्त्रे ‘विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः’ (ई.१९४३, पृ.९५) इति सूत्रं प्रतिपादितम् । एतद् रससूत्रं पश्चाद्वर्तिभिर्भट्टलोल्लटप्रभृतिभिर्विद्वद्भिर्व्याख्यातम् । मम्मट-विश्वनाथदिभिराचार्यैरपि रसस्य विस्तरेण विवेचनं कृतम् । आनन्दवर्धनाचार्योऽपि रसं व्यङ्ग्यं स्वीकृत्य वस्त्वलङ्काररसध्वनीनां चर्चां विधाय काव्ये रसध्वनेरुत्कृष्टतां प्रतिपादयति । आचार्य विश्वनाथः ‘वाक्यं रसात्मकं काव्यम्’ इति कथयन् रसं काव्यस्यात्मरूपेण विवेचयति । अस्यानुसारेण रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपदार्थसम्पर्कशून्यः, ब्रह्मसाक्षात्कारसदृशः अलौकिकचमत्कारप्राणस्वरूपो भवति । एवमेव मम्मटानुसारं लोके रत्यादेः स्थायिनो यानि कारणकार्यसहकारीणि तान्येव काव्ये नाट्ये च विभावानुभावव्यभिचारिणः कथ्यन्ते । एतैर्व्यक्तः स्थायिभाव एव रसः । विश्वनाथेन शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्सोद्भुतशान्तभेदेन नवरसानां सभेदं लक्षणोदाहरणानि च प्रस्तुतानि, अनेन मुनीन्द्रसम्मतो वत्सलरसश्च स्वीकृतः । मम्मटेन नवरसाः स्वीकृताः, परमेतेषां भेदाः सोदाहरणं विस्तरेण नैव प्रकाशिताः । भाव-रसाभास-भावाभास-भावोदय-भावसन्धि-भावशबलतानां लक्षणोदाहरणानि द्वयोर्ग्रन्थयोः प्रस्तुतानि ।

**समस्याकथनम्**

काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतस्य रसतत्त्वस्य तुलनात्मकमध्ययनमिति लेखे निम्नाङ्किताः समस्याः समागताः सन्ति–

- काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः रसतत्त्वविषयकं साम्यं किम् ?
- काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः रसतत्त्वविषयकं वैषम्यं किम् ?

**उद्देश्यम्**

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति -

- काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतं रसतत्त्वविषयकं साम्यावस्थायाः प्रकाशनम् ।
- काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः रसतत्त्वविषयकं वैषम्यावस्थायाः समीक्षणम्।

**अध्ययनविधिः**

अध्ययनमेतत् गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति । अध्ययनेऽस्मिन् पुस्तकालयीयानां सामग्रीणामुपयोगोऽस्ति । मूलरूपेणात्र मम्मटविरचितो काव्यप्रकाशग्रन्थः, विश्वनाथविरचितः साहित्यदर्पणग्रन्थश्चाधारसामग्रीरूपेण प्रयुक्तः । एवञ्च संस्कृतकाव्यशास्त्रिभिर्विरचितानि रसतत्त्वविषयकानि पुस्तकान्यप्यत्र सामग्रीरूपेण प्रस्तुतानि विद्यन्ते । रसतत्त्वविषये लिखिता विचाराः, लेखाश्चात्र सामग्रीत्वेन संयोजिताः । अत्र सङ्कलितानां सामग्रीणां व्याख्याविश्लेषणे वर्णनात्मकस्य व्याख्यात्मकस्य च विधेरुपयोगो विहितो वर्तते ।

**सीमाङ्कनम्**

अध्ययनेऽस्मिन् मम्मटविरचितस्य काव्यप्रकाशग्रन्थस्य रसविषयकश्चतुर्थोल्लासः, विश्वनाथविरचितस्य साहित्यदर्पणग्रन्थस्य रसतत्त्वविषयकस्तृतीयः परिच्छेदो विशेषेण विश्लेषितः । अनयोर्ग्रन्थकारयो रसविषयिणी मान्यताऽस्मिन् लेखे विवेचिता। अत्रान्यैः काव्यशास्त्रिभिः प्रतिपादिता रससिद्धान्ता नैव विश्लेषिताः । अत्र केवलं मम्मटविश्वनाथाभ्यां प्रस्तुतानां रसतत्त्वविषयस्यैव चर्चा विहिता । इयमेवास्य लेखस्य सीमा वर्तते ।

**पूर्वकार्यसमीक्षणम्**

अस्मिन् लेखे काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतस्य रसतत्त्वस्य तुलनात्मकमध्ययनं विहितमस्ति । एतत्शीर्षकसम्बद्धानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते –

विश्वनाथः साहित्यदर्पणः (ई. १९९४) इति लाक्षणिके ग्रन्थे रसस्वरूपविषयकं मतं स्थापयति - रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपदार्थसम्पर्कशून्यः, ब्रह्मसाक्षात्कारसदृशः अलौकिकचमत्कारप्राणस्वरूपो भवति । रसोऽयं सहृदयैरात्माकृतिवदभिन्नत्वेनानुभूयते ।

साहित्यदर्पणस्य टीकाकारः शेषराज शर्मा (ई. १९९४) ग्रन्थस्य प्रारम्भे साहित्यदर्पणस्य वैशिष्ट्य प्रस्तौति – अस्य ग्रन्थस्य तृतीये परिच्छेदे रसभावाः, तत्सम्बद्धाः नायकानां ४८ भेदाः, नायिकानां ३८४ भेदाः, नायकस्यापि सहायः, दूतभेदाः, नायकनायिकयोः गुणालङ्कारादिविषयाणाञ्च सविस्तरं निरूपणं कृतमस्ति ।

काव्यप्रकाशस्य टीकाकारो वासुदेव शास्त्री (ई. १९९४) काव्यप्रकाशस्य वैशिष्ट्यं प्रतिपादयति - श्रीमम्मटभट्टप्रणीतः काव्यप्रकाशो नामालङ्कारशास्त्रीयग्रन्थेषु महानिबन्धोऽन्यान्सर्वानतिशेते । नास्य तुलामन्यः कश्चनाधिरोहतीति सार्वजनीनमेव । अलङ्कारशास्त्रे चालङ्काराणां प्राधान्यात्प्राधान्येन व्यपदेशा भवन्तीति न्यायादलङ्कारशास्त्रमिति व्यपदेशः । काव्यस्य च याथार्थ्येनावबोधे सत्येव तत्फलीभूतयशोऽर्थकल्याणावाप्तिर्व्यवहारज्ञानमुपदेशलाभः परनिर्वृतिश्च जायते ।

कृष्णकुमारः 'अलङ्कारशास्त्र का इतिहास' (ई. १९९८) इति पुस्तकस्य 'रससम्प्रदायः' इति शीर्षकमाध्यमेन रसस्वरूपं विवेचयति । असौ रसपदप्रयोगस्य प्राचीनपरम्परां च प्रस्तौति - तैत्तिरीयोपनिषदि परब्रह्म रसनाम्ना कथ्यते - रसो वै सः । रसं ह्वेवायं लब्ध्वानन्दी भवति (२/७) । भरतमुनिनाऽथर्ववेदे रसस्य चर्चा विहितास्तीति विषयोऽप्यनेन सङ्केतितः - जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि (नाट्यशास्त्रम् १/१७) । एवञ्चानेन रसपदस्य व्युत्पत्तयोऽपि प्रस्तुताः, यथा - (क) रस्यते आस्वाद्यत इति रसः (ख) रस्यते अनेन इति रसः (ग) रसति रसयति वा इति रसः (घ) रसनं रसः आस्वादः । एतासु व्युत्पत्तिषु चतुर्थी व्युत्पत्तिरेव साहित्यिकः रस इति प्रतिपादयति ।

मम्मटः काव्यप्रकाशः (ई. १९९८) इति ग्रन्थे रसस्वरूपं प्रतिपादयति, मम्मटानुसारं लोके रत्यादेः स्थायिनो यानि कारणकार्यसहकारीणि तान्येव काव्ये नाट्ये च विभावानुभावव्यभिचारिणः कथ्यन्ते । एतैर्व्यक्तः स्थायिभाव एव रस इति ।

डा. राजवंश सहाय 'हीरा' 'संस्कृत साहित्य-कोश' (ई.२००२) इति कोशस्य 'रससम्प्रदायः' इति शीर्षकेऽस्य सम्प्रदायस्य विवेचनं करोति । तस्यानुसारं रससम्प्रदायः संस्कृतकाव्यशास्त्रस्य सर्वाधिकः प्राचीनतमः सिद्धान्तः । अस्य सम्प्रदायस्य संस्थापको भरतमुनिः । भरतमुनिप्रणीते नाट्यशास्त्रे रसस्य सूक्ष्मं वैज्ञानिकं व्यावहारिकञ्च विवेचनं कृतमस्ति । अनेनाष्टसङ्ख्यका रसा विवेचिताः । 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इत्यस्य रससूत्रम् । अस्य रससूत्रस्य व्याख्यायां भट्टलोल्लटस्योत्पत्तिवादः, श्रीशङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्याभिव्यक्तिवाद इति सिद्धान्ता विकसिताः ।

आचार्यरामचन्द्र मिश्रः 'संस्कृतसाहित्येतिहासः' (ई.२०१०) इति पुस्तकस्य 'साहित्यशास्त्रम् अलङ्कारशास्त्रम् वा' इति शीर्षके रससम्प्रदायस्य परिचयं प्रकटयति सम्प्रत्युपलभ्यमानो रससिद्धान्तो भरतेन प्रवर्तितः । तदीयम् 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रमेव रसस्वरूपनिर्णायकेष्वादिमं प्रसिद्धम् ।

आनन्दवर्धनाचार्यः ध्वन्यालोकः (ई.२०११) ग्रन्थस्य ध्वनिविवेचनक्रमेऽलङ्काराणां रसभावादितात्पर्येण विनिवेशनमावश्यकं भवतीति प्रतिपादयति ।

एभिः पूर्वाध्ययनैः रसतत्त्वविषये विविधैः समीक्षकैर्विविधेषु सन्दर्भेषु समीक्षणं कृतमस्तीति संलक्ष्यते । मूलतो रसवादिभिः आचार्यैर्भिन्नभिन्नरूपेण स्वकीयविचाराः प्रस्तुताः । कतिपयैः समीक्षकै रससम्प्रदायस्य विषये समग्रं समीक्षणमपि विहितमस्ति परं मम्मटेन विश्वनाथेन च प्रस्तुते रसतत्त्वविषये तुलनात्मकरूपेण विशदं समीक्षणं नैव कृतमस्ति । अतोऽनुसन्धानमेतत् नवीनविषयप्रतिपादने समर्थोऽस्तीति ।

**विषयविश्लेषणम्**

**मम्मटविश्वनाथयोः परिचयः**

आचार्य मम्मटः (मम्मटाचार्यः) कश्मीरदेशीयः, एकादशशताब्द्यां जातः, संस्कृतकाव्यशास्त्रस्य महान् आचार्यः, समीक्षकश्च आसीत् । मम्मटः काश्मीरदेशे जातः, किन्तु संस्कृतशिक्षायै वाराणस्यां निवसन् काव्यरचनां कृतवान् । मम्मटस्य प्रमुखः ग्रन्थः काव्यप्रकाशः । अयं ग्रन्थः काव्यशास्त्रस्य प्रमाणभूतः, सर्वाधिकप्रसिद्धश्च अस्ति । अत्र दश उल्लासाः सन्ति । काव्यप्रकाशे काव्यलक्षणम्, प्रयोजनम्, शब्दशक्तयः (अभिधा, लक्षणा, व्यञ्जना), रससिद्धान्तः, गुणाः, दोषाः, अलङ्काराः, काव्यभेदाः, काव्याङ्गानि, काव्यविवेचनञ्चेत्यादीनां विस्तृतं विवेचनं प्राप्यते । अस्य शब्दव्यापारवृत्तिः संगीतरत्नमाला चेति कृतयः सन्ति । असौ आनन्दवर्धनस्य ध्वनिवादस्य समर्थकः । अस्य काव्यप्रकाशे अभिनवगुप्तस्य मतानां समावेशः, भरतमुनेः, अन्येषामाचार्याणां मतानां समन्वयश्च संलक्ष्यते । काव्यप्रकाशे कारिका, वृत्तिः, उदाहरणञ्च वर्तते । मम्मटेन काव्यलक्षणविवेचनक्रमे गुणालङ्कारयोर्महत्त्वं, रसस्य च प्राधान्यं प्रतिपादितमस्ति । काव्यप्रकाशस्य प्रथमोल्लासे काव्यलक्षण-प्रयोजन-कारण-स्वरूपाणि प्रस्तुतानि । एवञ्च द्वितीयोल्लासे शब्दशक्तिविचारः प्रस्तुतः । तथैव तृतीयाद्युल्लासेषु रस-गुण-दोषालङ्कार-काव्यभेदादिविषया समाविष्टाः ।

आचार्य विश्वनाथः संस्कृतकाव्यशास्त्रस्य प्रमुख आचार्यः, कविः, समीक्षकश्चासीत् । अस्य जन्म चतुर्दशशताब्द्यां कलिङ्गदेशे (ओडिशाक्षेत्रे) अभवत् । अस्य पितुर्नाम चन्द्रशेखरः, पितामहस्य नाम नारायणदासश्चासीत् । विश्वनाथो बहुभाषाविद् आसीत् । अनेन स्वकृतौ सान्धिविग्रहिकः, अष्टादशभाषावारविलासिनीभुजङ्गः इत्यादीनामुपाधीनां उल्लेखो विहितः । विश्वनाथस्य प्रमुखो ग्रन्थः साहित्यदर्पणम् । ग्रन्थोऽयं संस्कृतकाव्यशास्त्रस्य अत्यन्तं प्रसिद्धः, व्यापकश्च मन्यते । अस्मिन् ग्रन्थे दश परिच्छेदाः सन्ति, यत्र काव्यस्वरूपम्, वाक्यलक्षणम्, रसः, काव्यभेदाः,

व्यञ्जना, काव्यभेदाः, काव्यदोषाः, गुणाः, रीतिः, अलङ्काराश्चेत्यादीनां विषयाणां विस्तारपूर्वकं निरूपणं कृतमस्ति । अनेन काव्यस्य आत्मा रसः स्वीकृतः । अनेनैव रससिद्धान्तः सर्वोच्चरूपेण स्थापितः । अस्य राघवविलासः (महाकाव्यम्), कुवलयाश्वचरितम् (प्राकृतकाव्यम्), नरसिंहविजयः (काव्यम्), प्रभावतीपरिणयः, चन्द्रकला (नाटिकाः), प्रशस्तिरत्नावली (षोडशभाषायाम्) चेति । विश्वनाथेन काव्यप्रकाशदर्पणनाम्ना मम्मटस्य काव्यप्रकाशस्य टीका अपि रचिता अस्ति । अस्य कृतिषु रससिद्धान्तस्य प्राधान्यम्, व्यञ्जनावादस्य समर्थम्, श्रव्य-दृश्यकाव्ययोः सम्यक् विवेचनं च दृश्यते ।

**साहित्यदर्पण-काव्यप्रकाशयोः प्रतिपादितं रसस्वरूपम्**

विश्वनाथविरचिते साहित्यदर्पणनामके लाक्षणिके ग्रन्थे मम्मटविरचिते काव्यप्रकाशे च रसस्वरूपविषये विस्तरेण प्रतिपादितमस्ति । तत्र चतुर्दशशतकोद्भवेन विश्वनाथेन प्रस्तुतं रसस्वरूपं यथा-

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥ (३/१)

रत्यादेरालम्बनोद्दीपनाख्यकारणद्वयेन, तत्कार्येणानुभावेन, निर्वेदादिरूपेण व्यभिचारिणा च व्यञ्जनावृत्या प्रतिपादितो रतिहासप्रभृतिः स्थायिभावो रसस्वरूपतां प्राप्नोति ।

एवमेव काव्यप्रकाशे मम्मटेन रसस्वरूपविषये प्रोक्तम् यत् -
कारणान्थ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥ (४/२७-२८)

लोके रत्यादेर्यानि कारणानि कार्याणि सहकारीणि कथ्यन्ते तान्येव काव्ये नाट्ये च रसज्ञैर्विभावानुभावव्यभिचारभावाः कथ्यन्ते । तैर्विभावाद्यैर्व्यञ्जनावृत्त्या प्रतिपादितः स्थायिभावः रसः ।

विश्वनाथेन साहित्यदर्पणग्रन्थे रसस्यास्वादनप्रकारोऽपि प्रस्तुतो दृश्यते, यथा -
सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ (३/२-३)

सत्त्वगुणस्याधिक्यात् विभावादिसमूहालम्बनत्वात् एकः स्वतः प्रकाशमानः सुखमयो ज्ञानस्वरूपो ज्ञेयान्तरसम्पर्करहितः, ब्रह्मसाक्षात्कारसदृशः, अलौकिकाश्चर्यजीवनरूपः प्रमापकैः आत्माकृतिवदभिन्नत्वेनायं रसास्वाद्यत इति ।

**करुणादिरसेभ्यः कथं सुखम् ?**

विश्वनाथः करुणादिरसेभ्योऽपि सुखं सञ्जायत इति प्रतिपादयति । अस्यानुसारेणास्मिन् विषये सहृदयानामनुभूतिरेव केवलं प्रमाणम् । करुणादिषु यदि दुःखं स्यात् तर्हि करुणादिरसास्वादनोत्कण्ठितो न भवेत् । सकलस्यापि जनस्य करुणबीभत्सभयानकादिषु प्रवृत्तिर्दृश्यत एव । काव्यसंश्रयादलौकिकविभावत्वं प्राप्तेभ्यो लौकिकशोकहर्षादेरपि सुखं सञ्जायते । साधारणीकरणव्यापारेण रत्यादिवासनायुताः सहृदयाः सर्वेभ्योऽपि शोकहर्षादेः सुखमेवानुभवन्ति । उक्तञ्च विश्वनाथेन –

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥ (३/४)
किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।
तथा रामायणादीनां भविता दुःखहेतुता ॥
हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात् ।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ॥
अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसा मताः ।
न जायते तदास्वादो विना रत्यादिवासनाम् ॥ (३/४-८)

करुणरसादिभ्यः सुखानुभूतेर्विषयो मम्मटेन काव्यप्रकाशे नैव प्रतिपादितः । विश्वनाथो रसास्वादे विभावादीनामेकः प्रतिभासो भवतीति कथयति –

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ।
ततः सम्मिलितः सर्वो विभावादिः सचेतसाम् ।
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥ (३/१५)

रसानुभूतिस्तु प्रपाणकरसन्यायेन भवति । यथा प्रपाणकरसे खण्डमरिचकर्पूरादीनां मिश्रणात् प्राग्विभिन्ना आस्वादा जायन्ते परं संमिश्रणानन्तरं तेषामपूर्व आस्वादः प्रतीयते तथैव विभावादीनामपि सम्मेलनात् प्राक् भिन्ना प्रतीतिर्जायते परं तेषां सम्मेलनानन्तरं रसरूपेणाऽपूर्व आस्वादोऽनुभूयते । साधारणीकरणेन भावको रामेण कृतानि समुद्रोल्लङ्घनादीनि कार्याणि स्वेनैव विहितानीति मनुते । तदनु नायकादीनां भावैः सह भावकस्य भावानां साधारणीकरणेन प्रमाता रामादौ विद्यमानमुत्साहादिभावं स्वयमेवानुभवति । विभावादिवत् विविधानां रसानां स्थायिभावोऽपि साधारणीकरणव्यापारेण प्रतीयते । मम्मटेन पूर्ववर्णितानां करुणरसादीनां सुखत्वसाधनस्य वर्णनं नैव प्रतिपादितम् ।

**रसस्यालौकिकत्वम्**

विश्वनाथेन साहित्यदर्पणस्य तृतीये परिच्छेदे रसविवेचनक्रमेऽस्यालौकिकत्वं प्रतिपादितमस्ति । रसो न ज्ञाप्यः, ज्ञाप्यो घटादिस्तु सन्नपि कदाचिदज्ञातो भवति परं रसस्तु तथा न । एवमेव रसः कार्यो न, नित्यो न, नापि भविष्यत्, न वर्तमानोऽपि, न निर्विकल्पकं न तु सविकल्पकम्, न परोक्षः, नापरोक्षश्च । अतो रस अलौकिक इति प्रतिपादयति, यथा –

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः ।
यस्मादेष विभावादिसमूहालम्बनात्मकः ।
तस्मान्न कार्यः नो नित्यः पूर्वसंवेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ।
नापि भविष्यन् साक्षादानन्दमयप्रकाशरूपत्वात् ।
कार्यज्ञाप्यविलक्षणभावान्नो वर्तमानोऽपि ।
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटं
न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते ।
तथाऽभिलाषसंसर्गयोग्यत्वविरहान्न सः ॥
सविकल्पकसंवेद्यः साक्षात्कारतया न च ।
परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसम्भवात् ।
तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ॥ (३/१९-२५)

अनन्तरं रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्त इत्यसौ प्रस्तौति ।

**विभावादीनां परिचयः**

मम्मटेन विभावानुभावव्यभिचारिभावैर्व्यक्तः स्थायी भाव एव रसः कथितः (४/२८) । अनेन विभावादीनां विस्तरेण विवेचनं नैव विहितम् परं विश्वनाथेन साहित्यदर्पणे विभावादीनां सविस्तरं विश्लेषणं कृतं संलक्ष्यते -

**विभावः** 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावपदस्य व्युत्पत्तिर्दृश्यते । विभावस्य च आलम्बनोद्दीपनाख्यौ द्वौ भेदौ स्तः । तत्र नायकादिकमवलम्ब्य रसोद्गमाद् नायकादिरालम्बनविभावः । अत्र विश्वनाथेन नायकनायिकादीनां नैकविधानां भेदानां सविस्तरं विवेचनं विहितमस्ति । ये रत्यादीन् स्थायिभावानुद्दीपयन्ति ते उद्दीपनविभावाः । आलम्बनस्य चेष्टा, देश-काल-चन्द्र-चन्दन-कोकिलालाप-भ्रमरझङ्कारादीनि उद्दीपनानि भवन्ति –

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ॥ (३/१३१)

**अनुभावः** लोके आलम्बनोद्दीपनकारणैर्नायकस्यान्तःकरणे उद्बुद्धं रत्यादिकं बहिः प्रकाशयत् कार्यमुच्यते, तदेव काव्यनाट्ययोरनुभावः कथ्यते -

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावकाव्यनाट्ययोः ॥ (३/१३२)

स्त्रीपुरुषाणां भावहावहेलारूपा अङ्गजा अलङ्काराः, लीलाविलाससदृशाः स्वभावजा अलङ्काराः, एवमेव स्तम्भस्वेदरोमाञ्चस्वरभङ्गवेपथुप्रभृतयः सात्त्विकभावाश्चानुभावाः -

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथूः ।
वैवर्ण्यमश्रु प्रलयं इत्यष्टौ सात्त्विकाः स्मृताः ॥ (३/१३३)

**व्यभिचारिभावः** रसप्रकाशनार्थं विभावानुभावापेक्षया विशेषादाभिमुख्येन सञ्चरणशीलो भावो व्यभिचारिभावः सञ्चारिभावो वा कथ्यते । एष व्यभिचारिभावः स्थायिभावे जले बुद्बुदवद् उन्मग्ननिर्मग्नरूपेण तिष्ठति -

विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः ॥ (३/१४०)

एते व्यभिचारिणस्त्रयत्रिंशद् भेदयुता दृश्यन्ते । ते च निर्वेदावेगदैन्यश्रममद-जडतौग्र्यमोहविबोधस्वप्नापस्मारगर्वमरणमलसतामर्षनिद्रावहित्थौत्सुक्योन्मादशङ्का स्मृतिमतिव्याधि-सन्त्रासलज्जा-हर्षासूयाविषादधृतिचपलताग्लानि-चिन्ता-वितर्काख्याः सन्ति -

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्था ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ॥ (३/१४१)

स्थिररूपेण विद्यमाने रत्यादावेते प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन सञ्चरन्ति ।

**स्थायिभावः** रसस्याविर्भावेऽनुकूलाः प्रतिकूला वा भावा यं तिरोधातुं न क्षमन्ते प्रत्युत यस्यानुकूल्येन साहाय्यमाचरन्ति असौ स्थायिभावः । रसास्वादनकाले ह्यसावानन्दाङ्कुरकन्दरूप एव । स्थायिभावोऽन्यैर्भावैर्न तिरोधीयते, अपि त्वत्यर्थं पुष्यते एव –

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः ॥ (३/१७४)

एते स्थायिभावा रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमभेदेन नवप्रकारका दृश्यन्ते -

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ (३/१७५)

विभावानुभावव्यभिचारिभावैः सामाजिकानां हृदि स्थिरतया विद्यमान एष एव स्थायिभाव रसरूपतां परिणमतीति ।

**रसाभिव्यक्तिप्रक्रिया**

रससिद्धान्तस्य प्रवर्तकः प्रथमशताब्द्यां जातो भरतमुनिरेव । भरतेन स्वकीये नाट्यशास्त्रे 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' (भरतमुनिः, ई.१९४३, पृ.९५) इति सूत्रं प्रतिपादितम् । एतद् रससूत्रं पश्चाद्वर्तिभिर्भट्टलोल्लटप्रभृतिभिर्विद्वद्भिर्व्याख्यातम् । तत्र मम्मट-विश्वनाथ-जगन्नाथादिभिराचार्यै रसस्य विस्तरेण विवेचनं कृतम् । तत्र भट्टलोल्लटो रससूत्रे विद्यमानस्य संयोगादित्यस्य जन्यजनकभावरूपात् सम्बन्धादित्यर्थं कृत्वा रसं विभावादीनां कार्यं कथयति । शङ्कुकः संयोगादित्यस्यानुमाप्यानुमापकसम्बन्धादित्यर्थं कृत्वा विभावादिभी रसस्यानुमानं स्वीकरोति । एवमेव भट्टनायकः संयोगादित्यस्य भोज्यभोजकभावरूपात् सम्बन्धादित्यर्थं कृत्वा अभिधाभिन्नयोर्भावकत्वभोजकत्वव्यापारयोर्माध्यमेन रसो भोज्यते इत्यर्थं प्रतिपादयति । एवञ्चाभिनवगुप्तः संयोगादित्यस्य व्यङ्ग्यव्यञ्जकरूपसम्बन्धमुपस्थाप्य विभावादिभी रसो व्यज्यत इत्यर्थं प्रकटयति (मिश्र, २०१०, पृ.१८९) । रसविवेचनक्रमे विश्वनाथेन मम्मटेन च भरतमुनिप्रणीतं रससूत्रम् (विभावानुभावव्यभिचारि- संयोगाद्रसनिष्पत्तिः) आधारीकृतम्, किन्तु अनयोर्व्याख्यासु वैलक्षण्यं दृश्यते ।

विश्वनाथेन भट्टलोल्लटप्रतिपादितस्यानुकार्यगतस्य रसस्य खण्डनं कृतम् -
पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा ।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥ (३/१७)

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च, तस्मात् कथं रसरूपतामियादिति । असौ श्रीशङ्कुकाभिमतस्य रसस्यानुकर्तृगतत्वञ्च निरस्यति –

शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत् ॥ (३/१८)

मम्मटाचार्येण भरतमुने रससूत्रं प्रस्तूय विभिन्नानामाचार्याणां रससूत्रविषयिणी व्याख्या प्रकटिता । तत्र प्रथममसौ भट्टलोल्लटप्रभृतीनां मतं प्रकटयति -
विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै रत्यादिको भावो जनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः ।
राम एवायम् अयमेव राम इति न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा न वाऽयमिति रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे ।

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥ २५ ॥
दैवादहमद्य तथा चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥ २६ ॥

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्त्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितः कारणकार्यसहकारिभिः कृत्रिमैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपाद् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।
न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिघातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः

स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिः सतत्त्वेन भोगेन भुज्यते इति भट्टनायकः ।

लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते, न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीविताविधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत्सर्वमिव तिरोदधद् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः । स च न कार्यः विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गाद् नापि ज्ञाप्यः सिद्धस्य तस्यासम्भवात् अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः । कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेद् न क्वचिद् दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम् । चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम् । लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्ययोऽप्यभिधीयताम् । तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात् । नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात् । उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः । (४/२८)

साहित्यदर्पण-काव्यप्रकाशौ उभावपि संस्कृतकाव्यशास्त्रीयौ ग्रन्थौ रससिद्धान्तस्य विवेचनं कुरुतः । उभाभ्यामपि ग्रन्थाभ्यां रसनिष्पत्तेः प्रक्रिया (रसस्य उत्पत्तिः कथं भवति इति) विभिन्नतया व्याख्याता । एतयोर्ग्रन्थयोरनुसारं संक्षेपेण रसनिष्पत्तिप्रक्रिया निम्नलिखिता-

मम्मटः काव्यप्रकाशे भरतस्य विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रससिद्धान्तं अनुसरन् व्याख्यां प्रस्तुतवान् । अस्यानुसारेण -

विभावाः - कारणभूताः ।
आलम्बनविभावः - पात्रम् (उदाहरणम्- रामः) ।
उद्दीपनविभावः - वातावरणम् (उदाहरणम् - वनम्, कालः) ।
अनुभावाः - स्थायीभावस्य बाह्यप्रकाशनम् (उदाहरणम्- अश्रुपातः, रोमाञ्चः) ।
व्यभिचारिभावाः - चञ्चलभावाः (उदाहरणम् - हर्षः, ग्लानिः, आशङ्का) ।
स्थायीभावः - स्थायित्वेन स्थितो भावः (उदाहरणम्- रतिः, शोकः) ।
एतेषां सङ्गमात् रसः जायते । रसः न केवलं पात्रे जायते, अपि तु सहृदयस्य हृदये अनुभूयते । अतः रसः अनुभूयमानः, नैव वस्तुस्वरूपयुतः ।

विश्वनाथेन स्पष्टं कृतं यत् रसः स्वयं स्थायीभाव एव, यः काव्ये विभावादिरूपेण प्रकाश्यते । काव्ये एषः स्थायीभावः विभावादिसहितः प्रस्तुतः, तदा सहृदयस्य हृदये सः रसः अनुभूयते । काव्ये स्थायीभावस्य विभावानुभावव्यभिचारिभावैः सह योगो जायते । सहृदयः स्वान्तःस्थं स्थायीभावं तेन उद्दीप्य अनुभवति । एषः अनुभूतः स्थायीभावः रसत्वेन प्रकाशते । विश्वनाथस्य दृष्ट्या, रसः वस्तुतः अनुभवः, न केवलं वस्तुतत्त्वम् । रसनिष्पत्तिविषये काव्यप्रकाशकारो मम्मटो विभावादिसंयोगं रसनिष्पत्तिः, रसस्य बीजम् स्थायीभावः, अनुभवं रसस्वरूपम्, रसास्वादकत्वेन सहृदयस्य भूमिका भवतीति स्वीकरोति । एवमेव साहित्यदर्पणकारो विश्वनाथोऽभिव्यक्तं स्थायीभावं रसः, रसमेव स्थायीभावः, अनुभवस्वरूपं रसस्वरूपम्, स्वान्तस्थभावाभिव्यक्तेः अनुभवकर्तृरूपेण सहृदयस्य भूमिका भवतीति स्वीकरोति ।

रसनिष्पत्तिविषये उभयोरपि आचार्ययोर्दृष्टिकोणः सुस्पष्टः । निष्कर्षरूपेण मम्मटो विभावादीनां संयोगेन रसो निष्पद्यत इति प्रस्तौति । विश्वनाथस्तु रसः हृदयहृदि विद्यमानः स्थायीभाव एव साक्षात् अनुभवविषयो जायत इति प्रकटयति । संस्कृतकाव्यशास्त्रे रससिद्धान्तः केन्द्रीयां भूमिकां निर्वहति ।

काव्यप्रकाशे "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इत्यादिना शब्दार्थयोर्निर्दोषतया गुणालङ्कारसंयुक्ततया च काव्यस्वरूपं निरूपितम् । किन्तु साहित्यदर्पणे विश्वनाथः "वाक्यं रसात्मकं काव्यम्" इत्यादिना रसः एव काव्यस्य आत्मा इति मत्वा शाब्दिकवैचित्र्यादिकं गौणं मन्यते । मम्मटस्य मते गुणालङ्कारयोरभावेऽपि रसः समर्थितः, परन्तु तेषां साहाय्येन रसः प्रकर्षं लभते । विश्वनाथस्तु रसम् एव प्रधानं मत्वा गुणालङ्कारादीन् तदङ्गभूतान् मन्यते । मम्मटः अलङ्कारसिद्धान्तानुयायी आसीत्, किन्तु विश्वनाथः आनन्दवर्धनप्रवर्तितं ध्वनिसिद्धान्तं स्वीकृत्य रसध्वनिमेव काव्यस्यात्वेन प्रतिपादयति । काव्यप्रकाशे अष्टरसानां स्वीकृतिर्वर्तते परं साहित्यदर्पणे अभिनवगुप्तप्रतिपादितो नवमः शान्तरसः स्वीकृतः। मूलतो विश्वनाथेन रसात्मकं वाक्यमेव काव्यम् इति लक्षणेन काव्यस्य मर्म प्रति सूक्ष्मदृष्टिः प्रकटिता । एवञ्चानेन भावकत्व-भोजकत्वव्यापारयोः कल्पना प्रस्तुता । तथैवानेन सहृदयस्य चित्तवृत्तेः सामान्यीकरणेन मनोवैज्ञानिकं विश्लेषणं विहितम् । उभयग्रन्थयोः रससिद्धान्ते मूलभूताः साम्याः सन्ति, यतस्तौ भरतमुनेः रससूत्रम् आधारीकुरुतः । किन्तु काव्यप्रकाशः शास्त्रीयनियमानां पालनं बलात् समर्थयति, साहित्यदर्पणन्तु रसस्य आध्यात्मिकं स्वरूपं प्रतिपाद्य काव्यमीमांसायां नूतनां दिशां प्रवर्तयति ।

**रसभेदाः**

काव्यप्रकाशे मम्मटेन नवसङ्ख्यकानां रसानां विवेचनं कृतं विलोक्यते । तत्र शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्तश्च ।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः
बीभत्सोद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥

| क्र.सं. | रसः | स्थायिभावः | स्वरूपम् |
|---|---|---|---|
| १. | शृङ्गारः | रतिः | सौन्दर्यं, प्रेमचेष्टा |
| २. | हास्यः | हासः | उपहासभावः |
| ३. | करुण | शोकः | दुःखानुभवः |
| ४. | रौद्रः | क्रोधः | क्रोधप्रकटीकरणम् |
| ५. | वीरः | उत्साहः | पराक्रमः, वीर्यप्रदर्शनम् |
| ६. | भयानकः | भयम् | भयानकदर्शनम् |
| ७. | बीभत्सः | जुगुप्सा | घृणाजनकदर्शनम् |
| ८. | अद्भुतः | विस्मयः | आश्चर्यस्फुरणम् |
| ९. | शान्तः | निर्वेदः | वैराग्यभावः |

साहित्यदर्पणानुसारं काव्ये वर्णितानां पात्राणां, घटनानां, स्थानकालविशेषाणां भेदः पाठक-दर्शकयोः मनसि न दृश्यते । तानि सर्वाणि भावरूपेण सामान्यीकृतानि भवन्ति। एतत् साधारणीकरणव्यापारः इति कथ्यते । साहित्यदर्पणानुसारेण रसाणां प्रकाराः -

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोद्भुत इत्यष्टौ रसाः, शान्तस्तथा मताः ॥

| क्र.सं. | रसाः | स्थायिभावाः | वर्णाः | दैवतः |
|---|---|---|---|---|
| १. | शृङ्गारः | रतिः | श्यामः | विष्णुः |
| २. | हास्यः | हासः | श्वेतः | प्रमथः |
| ३. | करुणः | शोकः | कपोतः | यमः |
| ४. | रौद्रः | क्रोधः | रक्तः | रुद्रः |
| ५. | वीरः | उत्साहः | हेमः | महेन्द्रः |
| ६. | भयानकः | भयम् | कृष्णः | कालः |
| ७. | बीभत्सः | जुगुप्सा | नीलः | महाकालः |
| ८. | अद्भुतः | विस्मयः | पीतः | गन्धर्वः |
| ९. | शान्तः | शमः | सुन्दरछायः | नारायणः |
| १०. | वत्सलः | वत्सलतास्नेहः | पद्मगर्भछविः | लोकमातरः |

विश्वनाथेन विप्रलम्भसम्भोगभेदेन शृङ्गाररसस्य भेदद्वयं प्रस्तुतम् । तत्र विप्रलम्भोऽपि पूर्वरागमानप्रवासकरुणरूपेण चतुर्धा विभक्तः । एवञ्च हास्योऽपि स्मितहसितविहसितावहसितापहसितातिहसितरूपेण षड्धा विभक्तः । तथैवानेन वीरोऽपि दानधर्मयुद्धदयाभेदेन चतुर्धा विभाजितः । अनेन भरतमुनिसम्मतो वत्सलरसोऽपि स्वीकृतः । मम्मटेन शान्तरसस्य विशेषेण विवेचनं कृतम् । अनेन शान्तरसो निर्वेदात्मको भवतीति प्रतिपादितः ।

**रसानां परस्परविरोधः**

विश्वनाथेन साहित्यदर्पणे विरोधिरसानां चर्चाऽपि विहिता । अनेन रसदोषनिरूपणक्रमे विरोधिरसानां परिहारस्योपाया अपि प्रस्तुताः । अस्यानुसारेण विरोधिरसानां स्थितिरत्र प्रस्तूयते –

आद्यः करुणबीभत्सरौद्रवीरभयानकैः ॥
भयानकेन करुणेनापि हास्यो विरोधभाक् ।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ॥
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता । (३/२५७)

| कस्य रसस्य | केन सह विरोधः ? |
|---|---|
| शृङ्गारः | करुणः, बीभत्सः, रौद्रः, वीरः, भयानकः । |
| भयानकः | करुणः, हास्यः । |
| करुणः | हास्यः, शृङ्गारः । |
| रौद्रः | हास्यः, शृङ्गारः, भयानकः । |
| वीरः | भयानकः, शान्तः । |
| भयानकः | शृङ्गारः, वीरः, रौद्रः, हास्यः, शान्तः । |
| शान्तः | वीरः, शृङ्गारः, रौद्रः, हास्यः, भयानकः । |
| बीभत्सः | शृङ्गारः । |

**भावादयः**

विश्वनाथेन रसविवेचनानन्तरं भावादीनां चर्चा विहिता । अनेन रसः, भावः, रसाभासः, भावाभासः, भावप्रशमः, भावोदयश्चेति सर्वेऽपि रसनधर्मयोजित्वात् रसा एव प्रतिपादिताः । उक्तञ्च –

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥ (३/२५९)

अनन्तरमनेन रसान्मुख्यतरा व्यभिचारिभावाः, देवादिविषया रतिः, प्रादुर्भावमात्रः रत्यादिभावश्च भावपदवाच्य इति प्रस्तुतः –

सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥ (३/२६०)

एवञ्च रसस्य भावस्य चानौचित्येन प्रवृत्तत्वे रसाभासो भावाभासो भवति । उपनायकसंस्थायां मुनिगुरुपत्नीगतायां बहुनायकविषयायां रतौ, तथैवान्यस्यामवस्थायाञ्च रसाभासो जायत इति विषयो विश्वनाथेन प्रस्तुतः –

अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ।
उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥
प्रतिनायकनिष्ठत्वने तद्वदधमपात्रतिर्यगादिगते ।
शृङ्गारेऽनौचित्यं, रौद्रे गुर्वादिगतकोपे ।
शान्ते च हीननिष्ठे, गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ॥
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ॥ (३/२६२-२६५)

एवमेव वेश्यादिविषये लज्जादिके प्रतिपादिते भावाभासो भवति । तथैव कस्यचिद्व्यभिचारिभावस्य शान्तौ भावशान्तिः, भावस्योदये भावोदयः, भावस्य सन्धौ भावसन्धिः, भावेषु मिश्रितेषु भावशवलता च जायत इति विश्वनाथेन प्रोक्तम् –

भावाभासो लज्जादिके तु वेश्यादिविषये स्यात् ॥
भावस्य शान्तावुदये सन्धिमिश्रितयोः क्रमात् ।
भावस्य शान्तिरुदयः सन्धिः शबलता मता ॥ (३/२६६-२६७)

विश्वनाथेन साहित्यदर्पणे प्रत्येकेषां भावादीनां विविधैः श्लोकैरुदाहरणमपि प्रस्तुतं संलक्ष्यते ।
मम्मटेन काव्यप्रकाशे भावादिविषयाः सङ्क्षेपेण प्रस्तुताः । रसविवेचनानन्तरमनेन भावस्य विषयः प्रस्तुतः । तत्रानेन देवमुनिगुरुनृपपुत्रादिविषया रतिः भावः कथितः, एवमेव प्राधान्येन व्यञ्जितो व्यभिचारी च भावपदाभिधेयः, तथैव भावस्य शान्तौ, भावस्योदये, भावानां शबलतायाञ्च क्रमेण भावशान्तिः, भावशबलता च भवतीति मम्मटेन प्रकाशितः। यथा-

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ॥
भावः प्रोक्तः, तदाभासा अनौचित्यप्रवर्तिताः ।
भावस्य शान्तिरुदयः सन्धिः शबलता तथा ॥ (४/३५,३६)

एते भावादयो मुख्ये रसेऽपि राजानुगतभृत्यवत् कदाचनाङ्गित्वं प्राप्नुवन्तीति विषयोऽपि मम्मटः प्रस्तौति - 'मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन' इति ।

**निष्कर्ष**

काव्यप्रकाश-साहित्यदर्पणग्रन्थयोः प्रस्तुतस्य रसतत्त्वस्य तुलनात्मकेऽध्ययने नैकविधा निष्कर्षाः प्राप्ताः । काव्यप्रकाशस्य चतुर्थे उल्लासे साहित्यदर्पणस्य च तृतीये परिच्छेदे रसविषयिणी चर्चा विद्यते । मम्मटेन काव्यप्रकाशेऽसंलक्ष्यध्वनिनिरूपणक्रमे रसस्य विवेचनं कृतम् । द्वयोरपि ग्रन्थयो रसानुभूतेः कारणरूपेण विभावानुभावव्यभिचारिभावानां चर्चा कृता । अत्र भरतमुनेर्विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिरिति रससूत्रमाधारीकृत्य रसस्य व्याख्यानं कृतम् । द्वयोरपि ग्रन्थयोः भट्टलोल्लट-श्रीशङ्कुक-भट्टनायक-अभिनवगुप्तानां रससूत्रविषयकं मतं प्रस्तुतम्, तत्र काव्यप्रकाशे विस्तरेण व्याख्यानमस्ति चेत् साहित्यदर्पणे सङ्क्षेपेण प्रस्तुतमस्ति । साहित्यदर्पणे करुणादिरसेभ्यः कथं सुखं सञ्जायत इति विषयः सोदाहरणं सकारणं च प्रस्तुतम् । तथैवात्र रसानुभूतौ साधारणीकरणव्यापारस्य विवेचनं कृतम् । अत्र रसस्यालौकिकत्वञ्च विविधैः प्रमाणैः प्रमाणितम् । एवञ्च विभावविवेचने विश्वनाथेन धीरोदात्तादीनां चतुर्विधानां नायकानां विश्लेषणं प्रस्तुतम्, एवमेव स्वकीयापरकीयादीनां बहुविधानां नायिकाभेदानां विवेचनं कृतमस्ति परं मम्मटेन नायकनायिकाभेदानां चर्चा नैव विहिता । विश्वनाथेन साहित्यदर्पणे त्रयत्रिंशद्विधानां व्यभिचारिभावानां लक्षणोदाहरणपूर्वकं विश्लेषणं प्रस्तुतमस्ति परं मम्मटेनैतेषां भावानां केवलं नामान्येव प्रस्तुतानि । अनेन शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्सोद्भुतशान्तभेदेन नवरसानां सभेदं लक्षणोदाहरणानि च प्रस्तुतानि, एवमेवानेन मुनीन्द्रसम्मतो वत्सलरसश्च स्वीकृतः । मम्मटेन नवरसाः स्वीकृताः, परमेतेषां भेदाः सोदाहरणं विस्तरेण नैव प्रकाशिताः । भाव-रसाभास-भावाभास-भावोदय-भावसन्धि-भावशबलतानां लक्षणोदाहरणानि द्वयोर्ग्रन्थयोः प्रस्तुतानि । मूलतो मम्मटस्यापेक्षायां विश्वनाथेन सूक्ष्मरूपेण रसतत्त्वस्य विवेचनं कृतं संलक्ष्यते ।

**सन्दर्भग्रन्थसूची**

1. आनन्दवर्धन (ई.२००६), ध्वन्यालोकः, चौखम्बा संस्कृत सिरिज अफिस ।

2. उपाध्याय, केशवप्रसाद (२०५५), पूर्वीय काव्यसिद्धान्त, तृ.सं., साझा प्रकाशन।
3. उपाध्याय, बलदेव (ई.१९९२), संस्कृत साहित्य का इतिहास (दशम सं.), शारदा निकेतन।
4. भट्टाचार्यः, कान्तिचन्द्र (२०६७), काव्यदीपिका (टीका - वेणीमाधवढकालः), विद्यार्थी पुस्तक भण्डार।
5. भरतमुनिः (ई. १९४३), नाट्यशास्त्रम्, (व्या.पं.केदारनाथ), सत्यभामावाई पाण्डुरङ्ग।
6. मम्मटः (ई.१९९४), काव्यप्रकाशः (द्वि.सं.), (व्याख्या - वासुदेव शास्त्री अभ्यंकर), चौखम्बा विद्याभवन।
7. मिश्रः, जगदीशचन्द्रः, (ई. २०२२), संस्कृतकाव्यशास्त्रेतिहासः, चौखम्बा सुरभारती प्रकाशन।
8. मिश्रः, रामचन्द्र (ई.२०१०), संस्कृतसाहित्येतिहासः, चौखम्बाविद्याभवन।
9. राजवंश सहाय 'हीरा' (ई.२००२), संस्कृत साहित्य-कोश (च.सं.), चौखम्बा विद्याभवन।
10. विश्वनाथः (ई.१९९५), साहित्यदर्पणः (पञ्चम सं.), कृष्णदास अकादमी।